M. T. B. COLLEGE, SURAT

*Manuscripts Library*

No. Ref.

Ser. 921

Title: Shivakavacha Vidhi

921

Z

| | |
|---|---|
| Shivakavachavidhi | Title. |
| | Author. |
| | Editor. |
| | Year, Vols. |
| SK | Publisher. |
| Karmakanda | Remark. |

921

गणेशाय नमः शिवकवचविधिः कार्त्तिके मार्गशीर्षे वा माघे वैशाखे वा ह्निके श्रावणे वा कुलेप
ेऽ जपसूत्र संभणकृत् एकादशशतं कुर्यादेकादशसहस्रं ततः एकादश लक्षं च जपं कुर्यात् त्रयं ततः
दुर्गमं मध्यमं प्रोक्तं कनिष्ठं चरवशान्ततः शिवस्य कवचं जप्त्वा नित्यं निर्धारयेत्ततः भूत प्रेत पिशाचा
श्च यक्ष गंधर्व राक्षसाः जपतस्तस्य नश्यंति कुर्यैः धीमान् शिवसन्निधौ नमस्कृत्य महादेवं० शुचौ देशे समा
सीनो यथा० अथ प्रयोगः देशकालौ संकीर्त्य ममेह जन्मनि जन्मान्तरे वा निखिल दुरित दौर्भाग्य
दुःस्वप्न दुर्निमित्त ग्रह भूत प्रेत पिशाच ब्रह्मराक्षसादि बाधा शांत्यर्थं पुत्र पौत्रादि धन वृद्धि सकल संतति सिद्धि फल
श्री प्राप्त्यर्थं शत्रुपराजय स्वदेहीष्ट सिद्ध्यर्थं श्री सांबसदाशिव प्रीत्यर्थं अमुक संख्यया शिवकवच
सहस्रावृत्त्योक्त मंत्रजपं शिवपंचाक्षरेण संपुटितं अमुक कामनया शिवकवच सहस्रावर्णी कृत मंत्र
जपमहं करिष्ये ब्राह्मणद्वारा वा आदौ निर्विघ्नता सिद्ध्यर्थं गणपति पूजनं पुण्याहवाचनं मातृकापू
जनं नांदी श्राद्धं आचार्यादि वरणं करिष्ये ऊंकारी सांकुर्यात् आसाचेनयेत् लंघ्य प्रार्थयेत् तत आचार्य
यजमानेन सह जपस्थाने शिवालये वा गत्वा आचम्य मूलेन प्राणायामानायम्य दीपं नृधारयमाणो देश
कालौ संकीर्त्य पूर्वसंकल्पित जपसंख्यापरिपूरणार्थं प्रतिदिनमष्टोत्तरशताधिक सहस्रसंख्यया शिव
कवचमंत्र जपमहं करिष्ये गणपतिं नत्वा आगमोक्त प्रकारेण आसनविधिं भूतशुद्ध्यादि पव
वनांतं आत्मरक्षां विधाय भूमिं प्रोक्ष्य स्वस्त्ययन मातृ दूमं मं चंद्र ध पठेत् तत्कल्पोक्त

न्यासं कुर्यात् तद्यथा मूलेनाचम्य मूलेन प्राणायामत्रयं कुर्यात् न्यासमारभेत् अस्य श्रीशिव
कवचमंत्रस्य शंभु ऋषिः श्रीसांबसदाशिवो देवता अनुष्टुप् छंदः महेशायेति बीजं गौरीतिशक्तिः
शर्वायेति कीलकं श्रीसांबसदाशिवप्रीत्यर्थे न्यासे विनियोगः शंभवे ऋषये नमः शिरसि अनुष्
टुप्छंदसे० मुखे ॐकारादि नमोंतं सर्वत्र ॐ श्रीसांबसदाशि— महेशायेति बीजं
गुह्ये गौरीतिशक्तये नमः पादयोः ॐ शर्वायेति [illegible] ॐ हुं गात्रालतेनमः
अंगुष्ठ० ॐ गुरवे० तर्ज० ॐ अगोचराय मध्य० ॐ अनंतेश्वराय अना० ॐ ईश्वराय कनि० ॐ त्रि
रथस्थितेकर० एवं हृदयादि ॐ प्रणवादि बंधविधाय ॐ अनन्ताय हृदि ॐ त्र्यंबकाय शिर० ॐ त्रिने
त्राय शिखा० ॐ वासिष्ठाय० कव० अनुष्टुप् छंदसे नेत्रत्रयाय ॐ रुद्रदेवतायै अस्त्रा० अथ दिग्ब
न्यासः ॐ दुं दुर्गायै नमः प्राचीदिशि बध्नामि ॐ विं विनायकाय दक्षिणादिशि० ॐ नं नंदिकेश्वरा
य प्रतीचीदिशि० ॐ क्षं क्षेत्रपालाय उदीचीदिशि० ॐ धं धर्मराजाय नमः सर्वदिशो बध्नामि
अथ मंत्रतंत्रग्रंथे यं विशेषः ॐ ब्रह्मणे नमः पादयोः ॐ विष्णवे हृदि ॐ महेश्वराय शिर०
ॐ सप्तर्षिभ्यो नमः शिखायां ॐ अश्विभ्यां नमः श्रोत्रे ॐ शशिभास्कराय चक्षुषि ॐ सरस्व
त्यै जिह्वायां ॐ अग्नये नमः वाचि ॐ मरुद्भ्यो नमः दंतेषु ॐ हव्यवाहनाय जठरे ॐ गंधर्वा
प्सरोभ्यो नमः पादौ ॐ महानागरथेभ्यो नमः हस्तकंठकर्णिकायां ॐ अष्टवसुभ्यो० वामहस्ते

ॐ एकादशरुद्रेभ्यो दक्षहस्ते ॐ द्वादशादित्येभ्यो नाभ्यां ॐ भैरवेभ्यो सर्वांगे अथ शिवपंचाक्षरन्यासः ॐ वाम
देवाय हृदि [illegible] शि० पंक्तिं मुखे श्रीसांब० [illegible] नमो गुह्ये ॐ नीलाय पादयोः ॐ उमाशक्तये सर्वांगे ॐ अं
गु० ॐ नं तर्ज० ॐ मं मध्य० ॐ शिं अना० ॐ वां कनि० ॐ यं करत० एवं हृदयादि ॐ नमः शिवायेति मंत्रेण मस्तकादि
पादांतं सर्वांगे एकादशवारं न्यस्य अथ कवचोक्त दशन्यासः ॐ सद्योजाताय दक्षपादे ॐ अघोराय वामपादे ॐ प
शुपतये दक्षजानुनि ॐ शर्वाय वामजानुनि ॐ विरूपाक्षाय दक्षकट्यां ॐ विश्वरूपाय वामकट्यां ॐ अनंताय
दक्षकुक्षौ ॐ कपर्दिने नमः वामकुक्षौ ॐ भैरवाय दक्षांसे शूलिने वामांसे ॐ ईशानाय मूर्ध्नि ॐ महेशाय सर्वांगे
ॐ पंचवक्त्राय तर्जन्यंगुष्ठयोगेन दिग्बंधः ध्यानं हस्ताभ्यां कलशद्वयामृतरसैराप्लावयंतं शिरो द्वाभ्यां तौ दधतं
मृगाक्षवलये द्वाभ्यां वहंतं परं अंकन्यस्तकरद्वयामृतघटं कैलासकांतं शिवं स्वच्छांभोजगतं नवेंदुमुकुटं दे
वं त्रिनेत्रं भजे श्रीसांबं वंदे [illegible] हिरण्यबाहुं हिरण्यरूपं पशुपाशविमोचकं पुरुषं कृष्णपिंगलं ऊर्ध्वरेतसं
विरूपाक्षं विश्वतः सहस्राक्षं सहस्रशीर्षं सहस्रचरणं विश्वतोबाहुं विश्वात्मानमेकमद्वैतं निष्कलं निर्गुणं शांतं शिव
मक्षरमव्ययं हरिहिरण्यगर्भादिसंपूज्यं अप्रमेयमनाद्यंतं शिवं मुकुटकाभयवरदं [illegible] व्याघ्राजिनांबरं चंद्रचूडं त्रिने
त्रं पंचवक्त्रं शिवं भजे इति ध्यात्वा अहं शिवः शिवोऽहं सोऽहं इति चेतसि चिंतयेत् लं पृथिव्यात्मकं गंधं परिकल्प
यामि हं आकाशात्मकं पुष्पमित्यादि अहमस्मि शिवोहमस्मि ब्रह्माहमस्मि इति भावयेत् अथ जपः अतः प
र्वपुराणं गुह्यमित्यादि व्याधीश्च नाशयतु मे जगतामधीशः इत्येतत् सकृत्पठित्वा शिवपंचाक्षरमनुमष्ट
सहस्रं वा शैवमुद्रां लिंगमुद्रां प्रदर्श्य ततः सहस्रवर्णात्मकं मंत्रजपः ॐ नमो भगवते सदाशिवायेत्यादि नमस्ते
नमः इत्यंतं महामंत्रं सहस्रवर्णात्मकं [illegible] शतं वा सकृद्वा जप्त्वा तत्समर्पयेत् प्राग्व
द्दिग्बंधं पूर्ववत् शिवपंचाक्षरमंत्रं अष्टोत्तरशतं जप्त्वा इति कवचं [illegible] वरद [illegible] इत्यादि समाप्तं [illegible] फलश्रुति

त्पठित्वा तत्कृद्धारितमपि मंत्रं श्रीशिवदेवताये गुह्येति मंत्रेण समर्पयेत् पुनः कृप्राथित्वा दिग्मानसौ कृतांजि
लं कुर्यात् षडंगं विधाय तद्रूपं आत्मानं भावयेत् मूलं वा प्रतिदिनं वा यथा यामाहतः कृतं सर्वं तदस्तु संपूर्णं
प्रसादान्महेश्वर यस्य स्मृत्या ० यदक्षरपदभ्रष्टं ० यत्कृतं जपपूजादि विदितं परमेश्वर मोक्षापवर्गसिध्यर्थं गृहा
ण परमेश्वर जपपूजादिकं देव यत्कृतं त्वदनुग्रहात् तेनमां भगवान् रुद्रः प्रीयतां परमेश्वरः अपराध भूमी
महितं ० नाथ योनिसहस्रेषु येषु येषु व्रजाम्यहं तावत्त्वं प्रीतिभावेन देहि त्वं सन्निधौ भव इति प्रार्थ
नविधिः अथ कामना पुत्रार्थं एकविंशति दिनमध्ये लक्षं जपेत् कन्यार्थी लक्षद्वयं धनार्थी दशलक्षं रोगना
शार्थं पंचलक्षं शिरोरोगादौ पंचदिनमध्ये लक्षमेकं जपेत् महारोगे तु एकादशदिनमध्ये एकादशल
क्षं जपेत् शूले लक्षमेकं सर्पभये लक्षषट्कं आयुर्वृध्यर्थं दशलक्षं विद्याकामस्तु लक्षत्रयं अत्र च कार्य
गुरुलघुभावेन जपसंख्या अयुतलक्षं दशलक्षादि बोध्या भूतब्रह्मराक्षसवेतालशाकिनीडाकिनी
पिशाचादि विविधपीडा निरासार्थं एकविंशतिदिनमध्ये एकादशलक्षं एकादशसहस्रं वा जपेत्
अथवा एकादशदिनपर्यंतं त्रसहस्रमष्टोत्तरशताधिकं जपेत् जपसमाप्तिपर्यंतं यजमानः आचार्य २
ऋत्विक्सहितो ब्रह्मचर्यं चरेत् हविष्याशनं नास्त्रियमुपेयात् अधः शयीत शूद्रादिभिः संभाषणं न
कुर्यात् त्रसहस्रमेकादशशतब्राह्मणान् भोज्य तेभ्यो दक्षिणां दद्यात् सम्यगर्थं तदाशिषं गृहीत्वा रसपूर्णां
ते एवं जपसमाप्तौ दशांशेन हवनमाह अपांते च प्रकर्तव्यो होमः सर्वफलप्रदः वेदोक्तमार्गविधि
ना कुंडे वा स्थंडिले पि वा ईश्वर उवाच सर्वेषां चैव धर्माणां पूर्वसेवाय दाकृता लक्षैकेन च सिध्यति

दशांशेन तु होमं कुर्यात् भूतशुद्धिं पुराकृत्वा न्यासजातं क्रमात्ततः परं पुण्याहं वाचयित्वा तु आचार्यं वरयेत्ततः प्रतिमा
निष्कमात्रस्य सौवर्णी कारयेद्बुधः तदर्धेनाथवा पादं वित्तशाठ्यविवर्जितः उमामहेश्वररूपं तत्र कुर्यात्प्र
यत्नतः राजतं वृषभं कृत्वा सोपस्करसमन्वितं क्षितिं लिखित्वा किरातो भद्रं वा साध्यो स्थापनक्रमात् अव्र
णं कलशं दृढं स्थापयेत् तंदुलोपरि पात्रं चोपरि संस्थाप्य वस्त्रेणैव सुशोभितं पूर्वं पंचामृतेन स्नपनं वस्त्र
युग्मेन वेष्टयेत् पूजयेन्मूलमंत्रेण पुष्पाद्यैः ध्यात्वा दिशि आग्निमावाहयेत् कुंडे निश्चलेनांतरात्मना
गृह्यसूत्रविधिवत् प्रार्थये च यथाविधिः अन्वाधानं ततो कृत्वा स्वगृह्योक्तविधानतः आज्येन
बिल्वपत्राणां पायसेन तिलैर्दूर्वया होतव्या शांतिके देवि शांतिकं सर्वेन भवेत्स्फुटं राज्यार्थी
बिल्वपत्राणां होमयेच्च विरोजितः मधुत्रितयसंयुक्तं सर्वद्रव्यैश्च होमयेत् बकुलैः पुष्टिका
मस्तु गुडूचीभिर्ज्वरस्य च आयुष्कामस्तु दूर्वाभिः धनार्थी स्वर्णपुष्पकैः कदंबकुसुमैर्होमः सर्व
वश्यार्थिनः श्रियै अन्नार्थी धान्यहोमेन धनार्थी श्वेततंदुलैः मरीचतिलतैलौ कालस्वारसह
परं निर्गुंडीमूलहोमेन निगडस्य तु मोचयेत् यद्यदिष्टं नरो यस्तु तेन तेनैव होमयेत् पायसं गुड
खंडं च क्षीरमिक्षुगुडं तथा पराभिशं वशायं आरोग्यं श्रियमिच्छता पायसं चैव होमेन होतव्यं
शर्करान्वितं सिद्धान्नं परदुग्धेन कुर्यात् हस्तं विनाशयेत् अस्मिन्नेव कृते होमे शांतिः शांतिक
तोस्मृता पायसं तिलदूर्वाभिः साज्येन स्वाद्यमिश्रितैः ग्रहभूतादिभिः शैवस्य च फलमवाप्नुया
त् कटुकीभिः होमेन वेतालसिद्धिमाप्नुयात् चंपकैश्च कृते होमे सिंदूरस्यार संगमाः तिलै
श्च शांतिके कुर्यात् मधुनाज्यसमन्वितैः ब्रह्माद्या देवताः सर्वा घृतहोमेन तोषयेत् पूर्णाहुतिं

तो कुर्यात् होमं मध्ये शेषं समापयेत् आचार्यं पूजयेद् भक्त्या वस्त्रालंकारभूषणैः आचार्याय ततो दद्यात्
गां वृषसंयुतां सर्वसंगां ततो दद्या वस्त्रालंकारभूषिता ऋत्विजो रुद्रसंख्याकान् पूजयेद् भक्तिमान्
नः अथ पीठदेवताः मध्ये पूर्वे च विघ्नस्य दक्षिणे पश्चिमे तथा उत्तरस्यां मा वामाद्य सद्योजातादि
पंचकं पूर्वादिक्रमतो न्यसेत् सर्वाधिकादशौ हि वै तु भवः शर्वश्च रुद्रश्च ईश्वरश्च तथैव च भीमो
ग्रश्च महश्चैव शंकरः शंभुरेव च महेश्वरो महादेवो नामान्येतानि पूजयेत् ततः परं क्रमेणैव
व भैरवादीन् प्रकीर्तितः असितांगो रुरुश्चैव क्रोध उन्मत्तभैरवः कपाली भीषणश्चैव संहार
श्चाष्ट भैरवः ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा वाराही चेंद्राणी च चामुंडा चंडिका चेति ताः क्र
मात् इंद्रादि लोकपालान् स्थाप्य पूर्वादिक्रमतो न्यसेत् एता द्वाविंश देवांश्च पूजयेच्च यथा
विधि अथ यंत्रप्रकारः बिंदु त्रिकोण षट्कोणं चाष्टपत्रं ततो लिखेत् भूपुरं च ततः कृत्वा चतुर्द्वारं
योजयेत् इति घृताक्त तिलैः पीठदेवता होमः प्रधान होमांते स्विष्टकृदादि होमशेषं समाप्य
बलिदानं कुर्यात् पूर्णाहुति प्रणीता विमोकादि सर्वं समाप्य पुनः पूजां विधाय आचार्यादीन्
संपूज्य दक्षिणां दद्यात् अभिषेकं कृत्वा विघ्नतिथारणं तेन सोपस्करं पीठमाचार्याय दत्वा विष्णु ३
स्मरणं आशीर्वादं ततो ग्राह्य यजमानः स्वबांधवैः ब्राह्मणान् भोजयेत् पश्चाद् यथा वित्ता
नुसारतः ततश्च बांधवैः सार्धं स्वयं भुंजीत वाग्यतः एवं कृते विधाने तु जपः संपूर्णतां व्रजेत् इति
लिंगपुराणोक्त शिवकवचजपविधानं संपूर्णं शिवार्पितमस्तु ॥ ऽज्योपासिपस्य

अस्य श्रीशिवकवचमंत्रस्य ऋषभ ऋषिः शिरसि अनुष्टुप् छंदसे मुखे सदाशिवदेवतायै हृदि क्रौं बीजं क्रीं
शक्तिः हूं कीलकं अमुककामनासिध्यर्थे जपे वि० ॐ ह्रां सदाशिवाय अंगुष्ठा० ॐ ह्रीं गंगाधराय तर्जनी०
ॐ ह्रूं मृत्युंजयाय मध्य० ॐ ह्रैं शूलपाणये अनामि० ॐ ह्रौं अंबिकापतये कनि० ॐ ह्रः उमापतये कर० एवं हृ
दयादि वज्रदंष्ट्रं त्रिनयनं कालकंठमरिंदमं सहस्रनयनोपेतं वंदे शंभुमुमापतिं १ ध्यायेन्नीलं महेशं०
अथ सहस्राक्षरो मंत्रः ॐ नमो भगवते सदाशिवाय सकलतत्वात्मकाय सर्वमंत्रस्वरूपाय सर्वयंत्रा
धिष्ठिताय सर्वतंत्रस्वरूपाय सर्वतत्वविदूराय ब्रह्मरुद्रावतारिणे नीलकंठाय पार्वतीमनोहरप्रियाय
सोमसूर्याग्निलोचनाय भस्मोद्धूलितविग्रहाय महामणिमुकुटधारिणे माणिक्यभूषणाय सृष्टिस्थिति
प्रलयकालरौद्रावताराय दक्षाध्वरविध्वंसकाय महाकालभेदनाय मूलाधारैकनिलयाय तत्वाती
ताय गंगाधराय सर्वदेवादिदेवाय षडाश्रयाय वेदांतसाराय त्रिवर्गसाधनायानेककोटिब्रह्मांडनायका
यानंतवासुकितक्षककर्कोटकशंखकुलिकपद्ममहापद्मेत्यष्टनागकुलभूषणाय प्रणवस्वरूपाय चिदाका
शायाकाशदिक्स्वरूपाय ग्रहनक्षत्रमालिने सकलाय कलंकरहिताय सकललोकैककर्त्रे सकललो
कैकभर्त्रे सकललोकैकसंहर्त्रे सकललोकैकगुरवे सकललोकैकसाक्षिणे सकलनिगमगुह्याय सक
लवेदांतपारगाय सकललोकैकवरप्रदाय सकललोकैकशंकराय शशांकशेखराय शाश्वतनिजा
वासाय निराभासाय निरामयाय निर्मलाय निर्लोभाय निर्मदाय निश्चिंताय निरहंकाराय निरंकुशाय नि
ष्कलंकाय निर्गुणाय [illegible] निष्कामाय निरुपप्लवाय निरवद्याय निरंतराय निष्कारणाय नि
रातंकाय निष्प्रपंचाय निःसंगाय निर्द्वंद्वाय निराधाराय नीरागाय निष्क्रोधाय निर्ममाय निष्पापा

य निर्लेपाय निर्विकल्पाय निर्भेदाय निष्क्रियाय निस्तुलाय निःसंगाय निरंजनाय निरूपमविभवा
य निराश्रय शुद्धबुद्ध परिपूर्ण सच्चिदानंदाद्वयाय परमशांत तत्त्वरूपाय तेजोमयाय जयजय महारुद्र महा
रौद्र भद्रावतार महाभैरव कालभैरव कल्पांतभैरव कपालमालाधर खट्वांग खड्ग चर्म पाशांकुश
डमरुक त्रिशूल चापबाण गदाशक्ति भिंडिमाल तोमर मुसल मुद्गर प्रासपरशु पट्टीश परिघ भु
शुंडी शतघ्नी चक्राद्यायुध भीषणकर सहस्रमुख दंष्ट्राकराल वदन विकटाट्टहास विस्फारित ब्रह्मां
ड मंडल नागेंद्रकुंडल नागेंद्रहार नागेंद्रवलय नागेंद्रचर्मधर मृत्युंजय त्र्यंबक त्रिपुरांतक विश्वरूप वि
रूपाक्ष विश्वेश्वर वृषभवाहन विश्वतोमुख सर्वतो रक्ष २ मां ज्वल २ महामृत्यु अपमृत्युभयं नाशय २
चोरभयमुत्सादयोत्सादय विषसर्पभयं शमय २ चोरान् मारय २ मम शत्रून् उच्चाटयोच्चाटय त्रिशूले
न विदारय २ कुठारेण भिंधि २ खड्गेन छिंधि २ खट्वांगेन विपोथय २ मुसलेन निष्पेषय २ बाणैः संताडय २
रक्षांसि भीषय भीषयाशेषभूतानि विद्रावय २ कूष्मांड वेताल मारीच ब्रह्मराक्षसगणान् संत्रासय २
ममाभयं कुरु २ वित्रस्तं मामाश्वासयाश्वासय नरकभयान्मामुद्धरोद्धर संजीवय २ क्षुत्तृड्भ्यां मा
माप्याययाप्यायय दुःखातुरं मामानंदयानंदय शिवकवचेन मामाच्छादयाच्छादय मृत्युंजय ४
त्र्यंबक सदाशिव नमस्ते नमस्ते इति सहस्राक्षर मंत्रः इदं तत्कवचं शैवमित्यादि योगी स्वेच्छ....
तियो दृष्टं पठेत् तत्रकालः कार्तिके मार्गशीर्षे वा माघे वैशाख वसंते के श्रावणे वकुलोपदेशे जप
स्यारंभणं कुरु २ इसलं पद्धवितेन.